# শ্রীবিষ্ণুপঞ্জরস্তোত্রম্

{॥ শ্রীবিষ্ণুপঞ্জরস্তোত্রম্ ॥}

শ্রীগণেশায নমঃ ।

ওঁ অস্য শ্রীবিষ্ণুপঞ্জরস্তোত্রমন্ত্রস্য নারদ ঋষিঃ । অনুষ্টুপ্ ছন্দঃ ।

শ্রীবিষ্ণুঃ পরমাত্মা দেবতা । অহং বীজম্ । সোহং শক্তিঃ । ওঁ হ্রীং কীলকম্ ।

মম সর্বদেহরক্ষণার্থং জপে বিনিযোগঃ ।

নারদ ঋষযে নমঃ মুখে । শ্রীবিষ্ণুপরমাত্মদেবতাযৈ নমঃ হৃদযে ।

অহং বীজং গুহ্যে । সোহং শক্তিঃ পাদযোঃ । ওঁ হ্রীং কীলকং পাদাগ্রে ।

ওঁ হ্রাংহ্রীংহ্রূংহ্রৈংহ্রৌংহ্রঃ ইতি মন্ত্রঃ ।

ওঁ হ্রাং অঙ্গুষ্ঠাভ্যাং নমঃ । ওঁ হ্রীং তর্জনীভ্যাং নমঃ ।

ওঁ হ্রূং মধ্যমাভ্যাং নমঃ । ওঁ হ্রৈং অনামিকাভ্যাং নমঃ ।

ওঁ হ্রৌং কনিষ্ঠিকাভ্যাং নমঃ । ওঁ হ্রঃ করতলকরপৃষ্ঠাভ্যাং নমঃ ।

ইতি করন্যাসঃ ।

অথ হৃদযাদিন্যাসঃ । ওঁ হ্রাং হৃদযায নমঃ । ওঁ হ্রীং শিরসে স্বাহা ।

ওঁ হ্রূং শিখাযৈ বষট্ । ওঁ হ্রৈং কবচায হুম্ ।

ওঁ হ্রৌং নেত্রত্রযায বৌষট্ । ওঁ হ্রঃ অস্ত্রায ফট্ । ইতি অঙ্গন্যাসঃ ।

অহংবীজপ্রাণাযামং মন্ত্রত্রযেণ কুর্যাত্ ।

অথ ধ্যানম্ ।

পরং পরস্মাৎপ্রকৃতেরনাদিমেকং নিবিষ্টং বহুধা গুহাযাম্ ।

সর্বালযং সর্বচরাচরস্থং নমামি বিষ্ণুং জগদেকনাথম্ ॥ ১॥

Stotram Digitalized By Sanskritdocuments.org

ওঁ বিষ্ণুপঞ্জরকং দিব্যং সর্বদুষ্টনিবারণম্ ।
উগ্রতেজো মহাবীর্যং সর্বশত্রুনিকৃন্তনম্ ॥ ২॥

ত্রিপুরং দহমানস্য হরস্য ব্রহ্মণোদিতম্ ।
তদহং সম্প্রবক্ষ্যামি আত্মরক্ষাকরং নৃণাম্ ॥ ৩॥

পাদৌ রক্ষতু গোবিন্দো জঙ্ঘে চৈব ত্রিবিক্রমঃ ।
ঊরূ মে কেশবঃ পাতু কটিং চৈব জনার্দনঃ ॥ ৪॥

নাভিং চৈবাচ্যুতঃ পাতু গুহ্যং চৈব তু বামনঃ ।
উদরং পদ্মনাভশ্চ পৃষ্ঠং চৈব তু মাধবঃ ॥ ৫॥

বামপার্শ্বং তথা বিষ্ণুর্দক্ষিণং মধুসূদনঃ ।
বাহূ বৈ বাসুদেবশ্চ হৃদি দামোদরস্তথা ॥ ৬॥

কণ্ঠং রক্ষতু বারাহঃ কৃষ্ণশ্চ মুখমণ্ডলম্ ।
মাধবঃ কর্ণমূলে তু হৃষীকেশশ্চ নাসিকে ॥ ৭॥

নেত্রে নারাযণো রক্ষেল্ললাটং গরুডধ্বজঃ ।
কপোলৌ কেশবো রক্ষেদ্বৈকুণ্ঠঃ সর্বতোদিশম্ ॥ ৮॥

শ্রীবৎসাঙ্কশ্চ সর্বেষামঙ্গানাং রক্ষকো ভবেত্ ।

পূর্বস্যাং পুণ্ডরীকাক্ষ আগ্নেয্যাং শ্রীধরস্তথা ॥ ৯॥

দক্ষিণে নারসিংহশ্চ নৈরৃত্যাং মাধবোঽবতু ।
পুরুষোত্তমো মে বারুণ্যাং বাযব্যাং চ জনার্দনঃ ॥ ১০॥

গদাধরস্তু কৌবের্যামীশান্যাং পাতু কেশবঃ ।
আকাশে চ গদা পাতু পাতালে চ সুদর্শনম্ ॥ ১১॥

সন্নদ্ধঃ সর্বগাত্রেষু প্রবিষ্টো বিষ্ণুপঞ্জরঃ ।
বিষ্ণুপঞ্জরবিষ্টোঽহং বিচরামি মহীতলে ॥ ১২॥

রাজদ্বারেঽপথে ঘোরে সঙ্গ্রামে শত্রুসঙ্কটে ।
নদীষু চ রণে চৈব চোরব্যাঘ্রভযেষু চ ॥ ১৩॥

ডাকিনীপ্রেতভূতেষু ভযং তস্য ন জাযতে ।
রক্ষ রক্ষ মহাদেব রক্ষ রক্ষ জনেশ্বর ॥ ১৪॥

রক্ষন্তু দেবতাঃ সর্বা ব্রহ্মবিষ্ণুমহেশ্বরাঃ ।
জলে রক্ষতু বারাহঃ স্থলে রক্ষতু বামনঃ ॥ ১৫॥

অটব্যাং নারসিংহশ্চ সর্বতঃ পাতু কেশবঃ ॥

দিবা রক্ষতু মাং সূর্যো রাত্রৌ রক্ষতু চন্দ্রমাঃ ॥ ১৬॥

পন্থানং দুর্গমং রক্ষেৎসর্বমেব জনার্দনঃ ।

রোগবিঘ্নহতশ্চৈব ব্রহ্মহা গুরুতল্পগঃ ॥ ১৭॥

স্ত্রীহন্তা বালঘাতী চ সুরাপো বৃষলীপতিঃ ।

মুচ্যতে সর্বপাপেভ্যো যঃ পঠেন্নাত্র সংশযঃ ॥ ১৮॥

অপুত্রো লভতে পুত্রং ধনার্থী লভতে ধনম্ ।

বিদ্যার্থী লভতে বিদ্যাং মোক্ষার্থী লভতে গতিম্ ॥ ১৯॥

আপদো হরতে নিত্যং বিষ্ণুস্তোত্রার্থসম্পদা ।

যস্ত্বিদং পঠতে স্তোত্রং বিষ্ণুপঞ্জরমুত্তমম্ ॥ ২০॥

মুচ্যতে সর্বপাপেভ্যো বিষ্ণুলোকং স গচ্ছতি ।

গোসহস্রফলং তস্য বাজপেযশতস্য চ ॥ ২১॥

অশ্বমেধসহস্রস্য ফলং প্রাপ্নোতি মানবঃ ।

সর্বকামং লভেদস্য পঠনান্নাত্র সংশযঃ ॥ ২২॥

জলে বিষ্ণুঃ স্থলে বিষ্ণুর্বিষ্ণুঃ পর্বতমস্তকে ।

জ্বালামালাকুলে বিষ্ণুঃ সর্বং বিষ্ণুমযং জগত্ ॥ ২৩॥

ইতি শ্রীব্রহ্মাণ্ডপুরাণে ইন্দ্রনারদসংবাদে শ্রীবিষ্ণুপঞ্জরস্তোত্রং সম্পূর্ণম্ ॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com, NA,

PSA

Easwaran

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Vishnu Panjara Stotram ( From Brahma Puranam ) Lyrics in Bengali PDF
% File name : viShNupanjarastotrambrahmANDapurANa.itx
% Category : upaniShat
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com
% Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, NA, PSA Easwaran
% Description-comments : brahANDapurANa
% Latest update : April 29, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.

PDF file is generated [ October 13, 2015 ] at Stotram Website